# श्लोकचतुष्टयम् ।

१ यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया<br>
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।<br>
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः<br>
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ।।

२ पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या<br>
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।<br>
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः<br>
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।

३ अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः।।

४ शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गम।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।